Digitized by eGangotri

PRATYABHIJÑĀ KĀRIKĀ OF UTPALADEVA

BASIC TEXT ON —
PRATYABHIJÑĀ PHILOSOPHY
(The Doctrine of Recognition)

EXHAUSTIVE STUDIES

BY

Dr. R. K. KAW

Ah. I, i

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

उपोद्घातः (प्रत्यभिज्ञकारिकायां ज्ञानाधिकारे प्रथममाह्निकम्)

1 *Meaning and Purpose of Pratyabhijñā* :

कथंचिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन् ।
समस्तसम्पत् समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि ॥१॥

योजना संक्षिप्तार्थश्च :-

कथंचित् (परमेश्वरप्रसादादेव[1] अथवा स्वात्मनः प्रसादादेव[7]) महेश्वरस्य दास्यं (ईश्वरप्रत्यभिज्ञादर्शनस्यपात्रताम् अथवा स्वातन्त्र्यपात्रताम्[2]) आसाद्य (परिपूर्णतया सादयित्वा, अथवा स्वयंलब्ध्वा), जनस्य[3] (संपत्तिरहितस्य तस्मात् पारतन्त्र्यादि-दुःखैः पीडितस्य अखिलस्य लोकस्य) उपकारम् अपि इच्छन्, समस्तसंपत्[4] (सर्वं ऐश्वर्यं तस्य, स्वातन्त्र्यसंपत्ति-रूपा-सिद्धिः तस्याः, परमार्थलाभः[5] तस्य) समवाप्तिहेतुः (सम्यग् 'अवाप्तिः - विमर्शरूढिः, सैव हेतुः, ताम्) तत् (तस्य महेश्वरस्य, स्वात्मनः वा) – प्रत्यभिज्ञाम् उपपादयामि (संपादयामि) ।

Trans:- Somehow (viz by the grace[6] of the Lord. the Self), having myself become a deserving recipient of the Lord's gift of the highest knowledge (of Self-recognition) or freedom, wishing to render service (do good) to humanity (suffering from want and dependence on others) I am setting forth the doctrine of *Self-recognition* (*Pratyabhijñā*[8]) as a means of achieving affluence and freedom (*svātantrya-sampatti*), viz. all that is of highest value (*paramārtha-lābha*).

(Note :- A human being suffers owing to dependence on others (*pāratantrya*) and inferiority complex. Pratyabhijñā teaches that freedom (*svātantrya*) is the essential nature of Self. The individual is the architect of his own fate.)

K 1—1. *Pvṛ (Ud)*; 2. दीयते अस्मै स्वामिना सर्वं यथाभिलषितम् इति दासः तस्य भावः (दास्यम्) इत्यनेन परमेश्वररूपस्वातन्त्र्यपात्रता उक्ता (*Pv 1,14*)

3. अनवरतजननमरणपीडितस्य (*Pv I,15*)
(suffering from incessant births and deaths — Ag)

4. समस्ताः— पूर्णतादिरूपाः सर्वाः (*Bh I,33*); 5. *Pvṛ (Ud)*- १, संपत्तिः सिद्धिः (*Pv 1,15*) तां तां विभूति परविभूतिपर्यन्तां—(*Pv II*, 272-73).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

२, परापरसिद्धिप्रदायिनी (*Pv II, 275*) ३, परापरसिद्धिलक्षणा जीवनमुक्तिविभूति (*Pv II 272-73*)

(i. Prosperity, fortune, success and happiness; ii. both the higher and lower spiritual powers, and iii. the glories of the liberated life).

6. प्रसाद, अनुग्रह, शक्तिपात, 7. परमेश्वररूपः निजात्मैव (*Bh 1, 3*)

8. The term "*Pratyabhijñā*" is used, for the first time, in philosophic sense by Buddhists. According to them the special feature of knowledge ('*saññā*', the Pali form of '*sajñā*' meaning the 'conceptual knowledge') is the *recognising* (*paccabhiññā*), the Pali form of *pratyabhijña*' by means of a sign (*abhiññānena*', the Pali form of '*Abhijñānā*'). According to another explanation, a recognition takes place by the inclusion of the totality of the aspects of a thing. (*See History of Indian Philosophy* by S. N. Dass Gupta, P. 98)

Somānanda uses the term *Pratyabhijñā*, for the first time and once only, in his *Śivadṛṣṭi*, in a special philosophic sense, for the realization of the identity of this world, consisting of multiple objects —sentient and insentient, with the Supreme Being (Reality), by means of the processes of *perception* or direct observation (*dṛṣṭa*) of one of His aspects, viz. His *prakāshamanatā* (omnipresence), and *remembrence* (*smaṇa*) of His other aspects, His *sarvajñatā* (ominiscience) *sarvashaktimatta* (omnipotence), etc., as known from scriptures –

तस्माज्ज्ञेयं समग्रैक्यवस्तु शैवं व्यवस्थितम् ।
दृष्टस्मरणयोरैक्ये स्थिते तदुपपद्यते ।
तथा सा प्रत्यभिज्ञानात् स एवायमिति स्थितिः ॥ (*Śd IV, 118-120*)

In *recognition* the processes of *perception* (*dṛṣṭa*) and *remembrance* (*smaraṇa*) are associated or unified.

Utpaladeva uses the term *Pratyaibhijñā* in the sense of revealing the powers of Self—powers of knowledge and action (*dṛkkriyātmikā shakti*) :-

शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते । (*Pk I, 3*)

Abhinavagupta explains the term Pratyabhijñā as follows :-

अ] तस्य महेश्वरस्य 'प्रत्यभिज्ञा' प्रतीपमात्माभिमुख्येनज्ञानं प्रकाशः प्रत्य ।। प्रतीपम इति – स्वात्मावभासो हि न अननुभूतपूर्वो ऽविच्छिन्नप्रकाशत्वात्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तस्य, स तु तच्छक्त्यैव (माया शक्त्या स्वातन्त्र्यरूपया) विच्छिन्न इव विकल्पित इव लक्ष्यते... ।

('Tasya' means 'of Maheśvara'.; '*Prati*' (*pratīpam*) means 'backward'— in the inverted order or indirectly-i. e , that which was already known before but was forgotten (due to *Moha* or *Māya - shakti*) and is now remembered; 'Abhi' (abhimukhena) means 'directly', that which is cognised now; '*Jñānam*' means '*Prakashaḥ*', light of consciousness, i. e. awareness.)

अथवा प्रतीपं ज्ञातस्यापि विस्मृतस्येव छादितस्येव पुनः आभिमुख्येन न तु स्मर्यमाणतया अपितु स्फुटत्वेन ज्ञानं प्रत्यभिज्ञानं ...

(*Pv*-I, 20 Fn. 44)

ब] प्रत्यभिज्ञा च - भात-भासमानरूपानुसंधानात्मिका, स एवायं चैत्र इति प्रतिसंधानेन अभिमुखीभूते वस्तुनि ज्ञानम् ... ।

Recognition consists in the unification of what appeared before with what appears now, as in the judgement 'This is the same Chaitra, (known before)'.

ज] इहापि प्रसिद्धपुराण सिद्धान्तागमानुमानादिविदितपूर्ण-शक्तिस्वभावे ईश्वरे सति स्वात्मन्यभिमुखी - भूते तत्प्रतिसंधानेन ज्ञानम् उदेति, नूनं स एव ईश्वरोऽहम् — इति । (*Pv*—I, 20, 21)

(The Lord as possessed of supreme power is known from the Purāṇas, Siddhāntas, Āgamas as well as reasoning, inference, etc. and the Self is a fact of everybody's direct experience. Recognition (*Pratyabhijñā*) arises when the two experiences, the knowledge of the Lord as Supreme Power and the awareness of one's own Self, are unified in one's experience: 'Certainly I am that very Lord').

The experiences of direct perception (*dṛṣṭa*) and remembrance (*smaraṇa*) are unified in the experience of 'recognition' :-

स्मरणानुभवारूढा सामानाधिकरण्यधी : ।
संस्कारेंद्रियजन्या च प्रत्यभिज्ञा प्रकीर्तिता ।

(*Pv* I, 20 Fn)

Pratyabhijñā is, therefore, 'Recognition of Self as Maheshvara (the great Lord), because he possesses the powers of knowledge and action' :—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

कर्तरि ज्ञातरि आत्मन्यादिसिद्धे महेश्वरे ।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः ॥२॥

योजना :- कर्तरि ज्ञातरि आदिसिद्धे[1] (पूर्वसिद्धे) महेश्वरे[2] (स्वातन्त्र्ययुक्ते) आत्मनि सति, अजडात्मा (चेतनः, अजडात्मवादी वा, वैशेषिकादेः सांख्यादेः बौद्धादेर्जडः आत्मा, तान् विहाय[3]) कः निषेधं वा सिद्धिं वा विदधीत (कुर्यात्) ।

When *Ātman* (Self) is already a fact of everybody's experience, as possessing powers of action and cognition and having freedom (*svātantrya*) to use his powers, which sensible person (other than a Bauddha, Vaiśeṣika, and Sāṅkhya, according to whom Ātman is not sentient) would deny or establish the existence of such a being?

किंतु मोहवशादस्मिन्दृष्टे ऽप्यनुपलक्षिते ।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते ॥३॥

योजनाः- दृष्टे अपि, किन्तु मोहवशाद् (माया-व्यामोहाद्) अनुपलक्षिते (सर्वथा हृदयंगमीभावमप्राप्ते), अस्मिन् (आत्मनि) शक्तिं (असाधारण-दृक्क्रियात्मिकाया शक्ति) आविष्करणेन (प्रदर्शनेन)[1] इयं प्रत्यभिज्ञा उपदर्श्यते (निरूप्यते) ।

K I ctd — तदयं प्रमाता ज्ञानक्रियाशक्तियोगाद् ईश्वरः इति—

(Pv 1, 43)

Thus it is established that Maheshvara is the Self of all creatures, since all their activities follow from their powers of will, knowledge and action (which constitute their divine inheritence) :-

इच्छा-ज्ञान-क्रिया पूर्वा यस्मात्सर्वाः प्रवृत्तयः ।
सर्वेऽपि जन्तवस्तस्मादीश्वरा इति निश्चिताः ॥ (*Pv I 43Fn*)

K 2-1, पूर्वसिद्धस्य (Known before) *Pvṛ*; अविच्छिन्नप्रकाशे (whose light (consciousness) is uninterrupted) (*Pv* I, 34); 'eternal' (Pandey)

2, ज्ञानं क्रिया च स्वसंवेदनसिद्धमैश्वर्यं, (*Pvṛ*); तदयं प्रमाता ज्ञान-क्रिया-शक्तियोगाद् ईश्वरः इति (*Pv I, 43*); स चायं स्वतन्त्रः । स्वातन्त्र्यं च अस्य अभेदे भेदनं भेदिते च अन्तरनुसंधानेन अभेदनम् —इति ... तदेव अस्य पारमेश्वर्यं मुख्यमानन्दमयं रूपम्-इति— (*Pv* I 31); (3) *Bh* I, 55

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Though the powers of Self are already known, yet they are hidden from awareness due to delusion or forgetfulness (*moha*); Pratyabhijñā is, therefore, set forth to reveal those powers of Self.

Maheshvara is the Self of all sentient and insentient :-

तथाहि जडभूतानां प्रतिष्ठा जीवदाश्रया ।
ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम् ॥४॥

योजना :- तथाहि (दृश्यतां किल), जडभूतानां प्रतिष्ठा (अवस्थानम्) जीवदाश्रया ('जीवन्तं' प्रमातारमाश्रित्य भवति)[1] । ज्ञानं क्रिया च जीवतां भूतानां जीवनं मतम्[2] ।

Ques. This world comprises multiple objects of experience, sentient and insentient. It is only sentients who possess powers of knowledge and action; Insentients do not either possess the power of knowledge, or the power of action. How is it then possible to establish that *Maheshvara* is the Self of all ?

Ans. It is an evident fact that the existence of insentients depends upon sentient beings; and (the powers of) knowledge and action are admitted to be the very life of living beings (sentients).

K 3 1, शक्त्याविष्करणेन असाधारण—प्रभावाभिज्ञापनख्यापनेन (*Pvṛ*)

(i, e revealing the extra-ordinary powers or profounder faculties of Self).

कथं शक्तेः .. दृक्क्रियात्मिकाया (शक्त्या) 'आविष्करणेन' ...

(bringing into awareness higher powers of comprehension (दृक्) and action (क्रिया) (*Pv* I, 37)

मोहापसारणमात्रमेतत्

(It is the mere removal of the veil of obscuration, *moha* or *māyā*).

Note :- Pratyabhijñā, therefore, means to become aware again of the (profounder) powers of Self (*Maheśvara*), which are not unknown before (*nānānubhūta·pūrvaḥ*)' but which are obscured by the veil of *moha* or *māyā*.

CC-0. In Public Domain. Funding by IKS-MoE

CC-0. In Public Domain. Funding by IKS-MoE

(*In this view the insentients also possess the essential characteristics of Maheshvara.*)

तत्र ज्ञानं स्वतः सिद्धं क्रिया कायाश्रितासती ।
परैरप्युपलक्ष्येत तथान्यज्ञानमूह्यते ॥५॥

योजना :- तत्र (तयोर्ज्ञानक्रिययोर्मध्ये) ज्ञानं स्वतः सिद्धम् । क्रिया अपि (स्वतः सिद्धा, सा) कायाश्रितासती परैरुपलक्ष्येत । तया (क्रियया)

K 4 1, तेषां 'जडभूतानां' चिन्मयत्वेऽपि, मायाख्यया ईश्वरशक्त्या जाड्यं प्रापितानां 'जीवन्तं' प्रमातारमाश्रित्य 'प्रतिष्ठा' तत्प्रमात्राभिमुख्येन अवस्थानं, ततो जडा नाम न पृथक् सन्ति ।

(*Pv I*, 41-42)

The commentator says that the insentient objects, though they are essentially of the nature of sentience (consciousness), yet they are reduced to the state of insentiency by the power of the Lord called *Māyā Śakti* They, therefore, have their being only as related to and dependent upon sentient subjects Hence insentient objects do not have independent existence

2, जीवनं च जीवनकर्तृत्वं तच्च ज्ञानक्रियात्मकं, यो हि जानाति च करोति च स जीवति—इत्युच्यते । तदयं ज्ञानक्रियाशक्तियोगाद् ईश्वरः- इति

(*Pv I*, 43)

The subject is characterised by life, that is the act of living which consists of knowing and doing. For, only he is said to be living who knows and acts, Therefore, the individual subject is the Lord, because he possesses the powers of knowledge and action. The Lordliness (*Māheshvarya*) is essentially the possession of these two powers in relation to all objects.

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE

अन्यज्ञानम् ऊह्यते 'गम्यते' ।

Ques. How do you establish the existence of powers of knowledge and action in the individual subject due to which he can be said to possess lordliness (*Maheshvarya*)?

Ans Out of these two powers, the power of knowledge is self-established; and the power of action (Which is also self-established), is perceptible to other perceivers, as it is associated with a particular body. From that (action) the presence of (the power of) knowledge in others is inferred.

K 5 1, तत्रापि प्रत्यक्षाज्ज्ञानमात्मसंवेद्यं परत्रापि क्रिययैव प्रसिद्ध्यर्थति—इति सिद्ध एव (*Pvṛ*); 2, तत्र जानामि — इत्यन्तः संरम्भयोगोऽपि भाति ... स च संरम्भो विमर्शः क्रियाशक्तिरुच्यते तेन आन्तरीयक्रियाशक्तिः ज्ञानवदेव स्वतःसिद्धा स्वप्रकाशा, सैव तु स्वशक्त्या प्राणपुयष्टकक्रमेण शरीरमपि - संचरमाणा स्पन्दनरूपा सती व्यापारव्यावहारात्मिका ... सा च परशरीरादि - साहित्येन अवगता स्वं स्वभावं ज्ञानात्मकमवगमयति । (*Pv I*, 46-47)

In the cognitive experience such as 'I know', there is consciousness of its association with a stir (*saṁrambha-yogaḥ*) also. This stir (*saṁrambha* or *spanda*) is called *Vimarsha*. It is the power of action. Therefore, says the commentator, internal power of action like that of cognition, is self-established and self-shining. That very internal power of action, because of its inherent power, enters into body, through the vital air and 'the group of eight' and being stirring nature in itself, become directly perceptible as physical action in the sphere of *Māyā*. That physical action, when seen in another person's body, logically makes us infer the presence of the power of knowledge (*jñāna*) which is its essential nature.

(Pandey - *Bh* III,

'The group of eight'—comprises five *prānas*, the group of organs, the group of organs of action and *Buddhi* (mind).

Digitized by eGangotri

Digitized by eGangotri

पूर्वपक्षविवृत्ति : (प्रत्यभिज्ञाकारिकायां ज्ञानाधिकारे द्वितीयमाह्निकम)

The Prima Facie View—the Existence of Atman Refuted :-

The Buddhist Saugata refutes the view of Shaivātma-vādin that there exists a permanent subject (Self) :-

ननु स्वलक्षणाभासं ज्ञानमेक परं पुनः ।
साभिलापं विकल्पाख्यं बहुधानापि तद्द्वयम् ॥ १ ॥

नित्यस्य कस्यचिद्द्रष्टु-स्तस्यात्रानवभासतः ।
अहं - प्रतीतिरप्येषा शरीराद्यवसायिनी[6] ॥ २ ॥

योजना :- ननु स्वलक्षण-आभासं ज्ञानम् (निर्विकल्पकम्) एकम्, पुनः परम् (अन्यत्) साभिलापं (शब्दनरूपेण सह वर्तते) विकल्पाख्यम् (सविकल्पकम्) बहुधा (स्मृतिसंशयोत्प्रेक्षादिबहुभेदं), तत द्वयम् अपि नित्यस्य कस्यचिद् द्रष्टुः न (भवतः), तस्य अत्र अनवभासतः, एषा अहं प्रतीतिरपि शरीरादि अवसायिनी (भवति) ।

(Saugata Purvapakṣin says, it is not right to say that there exists a permanent self-luminous Self. There are only the chains of indeterminate and determinate cognitions, but there is no substratum of the cognitions, nor any permanent being as cogniser apart from the fleeting cognitions)

Trans :— (There are only two kinds of cognitions); one is (indeterminate) cognition, which manifests itself in its essential nature (*svalakṣaṇābhāsam jñānam*) characterised by the limitations of time, space and form[1] (Being self-confined it is not applicable to others[2]) It is one (*ekam*), i. e has no variety[3]. The other (*param*) is the determinate cognition (*vikalpākhyam*), which admits of linguistic expression (*sābhilapām*)[4]. It is of many kinds (*bahudhā*) such as

---

1) स्वरूपसंकोच भागि 'लक्षण' देशकालाकार - रूपं यत्र तस्य 'आभासः' काशनम् अन्तर्मुखं यस्मिन् बहिर्मुखीन स्वरूपधारिणि ज्ञाने। *Pv*, I, 54;
2) 'स्वं' अन्यानुयायि । *Ibid.*
3) 'एक' - विषय भेदेऽपि एकजातीयं स्वरूपे । *Ibid*
4) 'साभिलापं'-अभिलापेन संजल्पात्मना शब्दनरूपेण सह वर्तते। *Ibid.* 55

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

या सा शक्तिः परा सूक्ष्मा निराचारेति कीर्तिता।
हृद्बिन्दुं वेष्टयित्वान्तः सुषुप्तभुजगाकृतिः ॥
तत्र सुप्ता महाभागे न किञ्चिन्मन्यते उमे।
चन्द्राग्निरविनक्षत्रैर्भुवनानि चतुर्दश।
क्षिप्तोदरे तु या देवी विषमूढेव सा गता ॥

सैव शक्तिकुण्डलिनी भगवती श्रीतन्त्रालोके—

कला सप्तदशी तस्मादमृताकाररूपिणी।

इत्यारभ्य—

प्रकाश्यसर्ववस्तूनां विसर्गरहिता तु सा।
शक्तिकुण्डलिका ..... ॥

इत्यन्तं निरूपितास्ति। परापराशक्त्यपरपर्यायाया विसर्गशक्तेरियं बीजात्मिका मध्यमा दशा भवति। अस्या विसर्गशक्तेराद्यन्तदशयोर्वर्णनं प्राणकुण्डलिनी पराकुण्डलिनीनिरूपणावसरे भविष्यति।

कामकलापरामर्शानुसारेण कौलयोग्यपि चर्याक्रमे तां शक्तिकुण्डलिनीं सिद्धयोगिनीसङ्घट्टात्मकसमावेशावसरे कामतत्त्वरूपतया साक्षात्करोति। यदाहुराचार्याभिनवगुप्तपादाः—

अत एव विसर्गोऽयमव्यक्तहकलात्मकः।
कामतत्त्वमिति श्रीमत्कुलगुह्वर उच्यते।
कामस्य पूर्णता तत्त्वं सङ्घट्टे प्रविभाव्यते ॥
[तं० ३-१४६]

श्रीवातूलनाथाचार्येणापि—

"सिद्धयोगिनीसङ्घट्टान्महामेलापोदयः"

इत्यस्मिन् सूत्रे महामेलापशब्देन सेयं शक्तिकुण्डलिनी निरूपिता, यस्यां क्षणमात्रमपि स्थितिं प्राप्य कौलयोगी वेद्यवेदकात्मशिवशक्त्यात्मद्वयविगलनेन तां शिवशक्त्यात्ममहासामरस्यरूपां स्थितिमनुभवति—इत्यस्यां सिद्धयोगिनीसङ्घट्टात्ममहामेलापदशायां शक्तिकुण्डलिनीदशामनुभवन् यः कौलयोगी

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

[illegible]

[illegible] चन्द्रसूर्यावुभावपि ।
सौषुम्ने [illegible] हित्वा ब्रह्माण्डगोचरम् ॥
यदा [illegible] प्रलीनशशिभास्करे ।
सौषुम्नदण्डमूले प्रबुद्धः स्यादनावृतः ॥
[स्पं० २४–२५]

इति श्रीकुलमुखादर्शतिरादितन्त्रेण यदा शैवयोगी क्षणमप्यवधानशैथिल्य-[illegible] सततमेव शिवात्मस्वावमनुसन्दधानः समावेशदशायामुन्मुखो भवति, तदानीं स्वात्मानुसन्धिमार्गादेतयोर्द्वौ प्राणापानौ सौषुम्ने मार्गे लयं गच्छतः, [illegible] प्राणशक्तिर्मूलाधारपदवीमाश्रयते। तस्मान्मूलाधारान्मध्योर्ध्वं [illegible] प्रोच्छलन्त्या विकल्पदशायां प्राणशक्तौ योगी प्राणकुण्डलिन्यवस्थामनु-[illegible]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

चर्याक्रममाचरति, स एव चर्याक्रमेऽधिकृतोऽस्ति, नान्य इत्यवधातव्यम्। तस्मात् परिपूर्णस्वात्मावमर्शनिष्ठानां पूर्णाशयानामेवास्मिन्निरुत्तरसमावेशास्पदे चर्याक्रमेऽधिकारो नेतरेषाम्। यदाहुः श्रीक्षेमराजपादाः—

ते नात्राधिकृताः परैः पुनरिदं पूर्णाशयैश्चर्य्यताम्।

[स्पं० नि०]

अथ प्राणकुण्डलिनीस्वरूपं निर्णीयते। चिच्चमत्कृतिरूपा विसर्गशक्तिः,

स्वात्मनः स्वात्मनि स्वात्मक्षेपो वैसर्गिकी स्थितिः।

[तं० ३–१४१]

इत्याचार्याभिनवगुप्तपादोक्त्या स्वात्मन्येव विसर्गस्योन्मेषदशां परामृशन्ती 'प्राक् संवित्प्राणे परिणता' इति नयेन प्राणनरूपतां चावभासयन्ती प्राणकुण्डलिनीरूपतयागमेषु निरूप्यते। यद्यप्यस्यां प्राणकुण्डलिनीरूपायां विसर्गशक्तौ प्राणनरूपत्वाद्बहिर्भावावभासनात्मिका स्थितिर्दृश्यते; तथाप्यत्र प्राणादिपञ्चवाहस्यानुन्मीलनात् स्वात्मानन्दचमत्कृतिमयत्वमेव सर्वतः प्रवर्तते। इयमेव प्राणकुण्डलिनीरूपा चितिशक्तिर्विसर्गस्यादिकोट्यात्मनि स्वरूपे स्फुरतीति कौलयोगिभिरनुभूयते। अत्र तु स्वानुभवसारमपि किञ्चिन्मया वर्ण्यते—

तामाश्रित्योर्ध्वमार्गेण चन्द्रसूर्यावुभावपि।
सौषुम्नेऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम्॥
तदा तस्मिन् महाव्योम्नि प्रलीनशशिभास्करे।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः॥

[स्पं० २४–२५]

इति श्रीवसुगुप्तपादप्रतिपादितनयेन यदा शैवयोगी क्षणमप्यवधानशैथिल्यमसहमानः सततमेव शिवात्मभावमनुसन्दधानः समावेशदशायामुन्मुखो भवति, तदास्य स्वात्मानुसन्धिबलादेवोभौ प्राणापानौ सौषुम्ने मार्गे लयं गच्छतः, तदनन्तरमस्य प्राणशक्तिर्मूलाधारपदवीमाश्रयते। तस्मान्मूलाधारान्मध्योर्ध्वमार्गेण प्रोच्छलन्त्यां विकस्वरायां प्राणशक्तौ योगी प्राणकुण्डलिन्यवस्थामनुभवति।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अत्र [प्राणकुण्डलिनोसमावेशदशायां] योगिनां द्वे गती भवतः। तत्राद्या यथा—केषाञ्चिद्यदा प्राणापानौ मध्यमार्गे लयं गच्छतस्तदा प्रथमं तावदधोमुखौ सन्तौ लम्बिकास्थानं भित्वाङ्गुलिपिहितकर्णघोषवद् ध्वनन्तौ मूलाधारचक्रं वेधयतः, तदास्य योगिनो मूलाधारचक्रमुक्तप्रकारेणैव सशब्दं पूर्णवेगेन परिवर्तत इति योगी प्राथम्येनानुभवति। ततो मूलाधारचक्रादुत्थिता मध्यवाहिनी प्राणशक्तिर्द्वितीयं नाभिस्थानगतं चक्रं वेधयति, यद्वशात्तद्द्वितीयमपि नाभिचक्रं वेगेन सशब्दं परिभ्रमति। तदानीं योगी यौगपद्येनानयोश्चक्रयोः परिवर्तन-दशामनुभवति[1]। तदनु तस्य योगिनः प्राणशक्तिर्नाभिचक्रात् समुत्थाय वेगेन हृच्चक्रं वेधयित्वोर्ध्वं गच्छति, तदा स योगी हृच्चक्रस्यापि वेगेन परिवर्तन-दशामनुभवति। ततः कण्ठस्थानमाप्ता सा मध्यवाहिनी प्राणशक्तिः कण्ठस्थान-गतं चक्रमेवं भ्रूमध्यस्थानगतं चक्रञ्च वेगेन वेधयति, यद्वशात्ते उभे चक्रे अपि वेगेन परिवर्तेते— इत्यस्य योगिन एवानुभवगोचरत्वमेति। इत्थं बिन्दुस्थानगतं चक्रं वेधयित्वायं योग्यस्यां प्राणकुण्डलिनीस्पन्दनदशायां मूलाधारचक्रस्थानादारभ्य भ्रूमध्यस्थानगतचक्रपर्यन्तानां समस्तानां चक्राणां यौगपद्येन सवेगं परिवर्तनरूपत्वमनुभवति, यदनन्तरमेव योगिनमणिमाद्यष्ट-सिद्धयः समाश्रयन्ते। अमुमेवाशयं वेधदीक्षाविचारावसरे आचार्याभिनवगुप्तपादाः श्रीतन्त्रालोक उपोद्बलयन्ति—

वेधदीक्षा च बहुधा तत्र तत्र निरूपिता।
सा चाभ्यासवता कार्या येनोर्ध्वोर्ध्वप्रवेशतः॥
शिष्यस्य चक्रसंभेदप्रत्ययो जायते ध्रुवः।
येनाणिमादिका सिद्धिः .....॥

[२९/२३७–२३८]

अथापरा सृतिर्यथा—केषाञ्चिच्च मन्दयोगिनां मध्यनाड्यां यदा प्राणापाना-वस्तं गच्छतस्तदा तेषां परमेश्वरशक्तिपातस्य मन्दत्वादेव मध्यवाहिनी प्राण-शक्तिर्विपर्ययेणैव प्रथमं भ्रूमध्यस्थानगतं चक्रं वेधयति, यद्वशादस्य योगिन-स्तच्चक्रं प्रथमं सशब्दं घूर्णते। तदनु कण्ठस्थानगतं चक्रं ततो मूलाधारस्थानं यावदखिलानि चक्राणि सशब्दं परिवर्तन्ते, येन तस्य योगिनः संसारवा-सनायास्तत्रावस्थितत्वेन न किञ्चिदनुभवगोचरत्वमेति। अणिमाद्यष्टसिद्धीनां कथा तु दूरापास्तैव; प्रत्युत स योगी निम्नाङ्कितेन पिशाचावेशेन समाविष्टो भत्वा विघ्नपरम्परामेवानुभवति। यदुक्तं श्रीरत्नमालायाम्—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

अधोऽवस्था यदा ऊर्ध्वं संक्रामन्ति वरानने।
सैव मोक्षपदावस्था सैव ज्ञानस्य भाजनम् ॥
ऊर्ध्वचक्रगतावस्था यदाधः संभवन्ति च।
तदा पैशाच आवेशः स वै विघ्नस्य कारणम् ॥

अथ कामकलां परामृशन् योगी सिद्धयोगिनीसङ्घट्टावसरात्मके चर्याक्रम इमां प्राणकुण्डलिनीदशां विषतत्त्वप्रवेशसमयेऽनुभवति। पूर्वोक्तरूपायां महामेलापदशायामादौ या दशा ह्यनुभूयते, सैव विषतत्त्वरूपागमेषु वर्णितास्ति। श्रीकुलगुह्वरतन्त्रे इयमेव वेधदीक्षा मन्त्र-नाद-बिन्दु-शाक्त-भुजङ्ग-परेतिरूपा षोढा वर्णिता—

मन्त्रवेधं तु नादाख्यं बिन्दुवेधमतः परम्।
शाक्तं भुजङ्गवेधं तु परं षष्ठमुदाहृतम् ॥

वेधदीक्षाषट्कस्य स्वरूपमधस्तान्निर्दिश्यते। मूलाधारचक्रादुत्थिता पूर्णाहन्तात्मकमन्त्रस्वरूपा प्राणकुण्डलिनी पूर्णाहन्ताबलात् समस्तानि चक्राणि वेधयन्ती आदिमा मन्त्रवेधदीक्षेति कथ्यते। मध्योर्ध्ववाहक्रमेण च प्रोच्छलन्ती नादाकारा सा द्वितीया नादवेधदीक्षेति भण्यते। वीर्यस्वरूपा सा प्राणकुण्डलिनी समस्तं चक्रवर्गं वेधयन्ती तृतीया बिन्दुवेधदीक्षेति नाम्ना व्यपदिश्यते। शक्तिरूपतामापन्ना चक्रवेधनक्रियापरा सा तुर्या शाक्तवेधदीक्षा भवति। सर्पाकारतामादधाना चक्रवेधनञ्च कुर्वाणा व्युत्तिष्ठन्ती भुजङ्गवेधदीक्षा पञ्चमी। पराशक्तिरूपतामाश्रयन्ती समस्तचक्रवेधनशीला सा परवेधदीक्षा षष्ठीति।

अथ पराकुण्डलिनीस्वरूपं विमृश्यते—परचितिरूपा विसर्गशक्तिर्यदान्तर्भावौन्मुख्यरूपान्तःकोट्यात्मनि स्वरूपे स्वात्मानं चमत्कुर्वाणा पूर्णाहन्तात्मके पद इदन्तासमावेशं तथेदन्तात्मके पदे पूर्णाहन्तायाः समावेशं कुर्वती समाधिव्युत्थानसामरस्यदायिनीं क्रममुद्रारूपां जगदानन्दस्वरूपात्मिकां पराकुण्डलिनीदशां प्रकाशयति। जगदानन्दस्य लक्षणं श्रीतन्त्रालोके यथा—

यत्र कोऽपि व्यवच्छेदो नास्ति यद्विश्वतः स्फुरत्।
यदनाहतसंवित्तिपरमामृतबृंहितम् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यत्रास्ति भावनादीनां न मुख्या कापि संगतिः
तदेव जगदानन्दमस्मभ्यं शम्भुरूचिवान् ॥
[५-५१,५२]

अत्रापि स्वानुभवानुसारं मया किञ्चिल्लिख्यते—तीव्रशक्तिपातभाजनस्य शिवयोगिनः प्राणा यदा सौषुम्ने मार्गे समाविशन्ति, तदा तस्य प्राणशक्तिर्मध्योर्ध्ववाहक्रमेण षट्चक्रवेधनक्रममस्पृष्ट्वैव ब्रह्मरन्ध्रस्थानमासाद्य चिदानन्दस्वरूपा भवति। इत्थं तस्य योगिनः क्रममुद्रायां समावेशो जायते। क्रमसूत्रेषूक्तम्—

"क्रममुद्रया अन्तःस्वरूपया बहिर्मुखः समाविष्टो भवति साधकः। तत्रादौ बाह्यादन्तः प्रवेशः, आभ्यन्तराद्बाह्यस्वरूपे प्रवेश आवेशवशाज्जायते। इति सबाह्याभ्यन्तरोऽयं मुद्राक्रमः" इति

किञ्चेदृशीं समावेशदशामनुभवन् समावेशचमत्कृतिबलादेव व्युत्थानेऽपि समस्तं भावजातं चिद्गगने लीयमानं पश्यन् योगी यदा किञ्चित् किञ्चद् व्युत्तिष्ठति, तदा तस्य सर्वाणीन्द्रियाणि प्राणापानसहितानि क्षण प्रादुर्भूय स्वात्मन्येव लीयन्ते, इत्थं स हिण्डोललीलावदुभयतः प्रसरन्तीमन्तर्बहिःसमावेशात्मिकां दशामनुभवन्नेव पराकुण्डलिनीधाम प्रविशति, येनास्योर्ध्वकुण्डलिनीरूपायां क्रियाशक्तौ समावेशो जायते, यद्वशात् कौलयोग्यपि सिद्धयोगिनीसङ्घट्टवेलायां निरञ्जनपदभाग् भवति। उक्तं हि—

"क्रियादेवो निरञ्जनम्" इति।

एवं कामकलारहस्याभिप्रायेण कामतत्त्वमिच्छाशक्तौ, विषतत्त्वं ज्ञानशक्तौ, निरञ्जनतत्त्वञ्च क्रियाशक्तावन्तर्भवन्ति। तथेच्छाशक्तिः शक्तिकुण्डलिनीति, ज्ञानशक्तिः प्राणकुण्डलिनीति, क्रियाशक्तिः पराकुण्डलिनीति च तत्र तत्र शिवागमेषु व्यपदिश्यते ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE